<u>दश नमस्कार</u>

प्रथमो नो नमस्कारः
प्रचोदनाय मित्राय
नमस्तेजोगोलकाय.... १

द्वितीयो नो नमस्कारः
विशालाऽकाशतत्त्वाय
नम ओंकारनादाय...२

तृतीयो नो नमस्कारः
तस्मै वायवे देवाय
नमः स्पर्श-तन्मात्राय...३

चतुर्थो नो नमस्कारः
तस्मै वरुणदेवाय
नमो जगत्पोषकाय...४

पञ्चमो नो नमस्कारः
रत्नगर्भायै धारिण्यै
नम आधारभूतायै .....५

षष्ठो नो नमस्कारः
अस्यै भारतजनन्यै
स्वाभिमानप्रतिमायै...६

सप्तमो नो नमस्कारः
जननी-जनकाभ्याम्
नमः स्नेहप्रेरकाभ्याम्...७

अष्टमो नो नमस्कारः
अस्मै विद्यादायकाय
आत्मज्ञानबोधकाय..८

नवमो नो नमस्कारः
ब्रह्मरूपदेहस्थाय
मूर्तभाव-चैतन्याय.....९

दशमो नो नमस्कारः
दिव्याय दिग्मण्डलाय
पुरोमार्गदर्शकाय....१०

🕉️ शांतिः शांतिः शांतिः॥